स्वर्णजयन्तीवर्षम् 2019-20

# वृद्धत्रयी

नाम

## प्राचीनायुर्वेदशास्त्रेतिहासः

श्रीगुरुपदशर्मंहालदारविरचितः

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

# वृद्धत्रयी

## नाम

## प्राचीनायुर्वेदशास्त्रेतिहासः

श्रीगुरुपदशर्म्महालदारविरचितः

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

**भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः**

**Published with the Financial Assistance from Central Sanskrit University,
Ministry of Human Resource Development, Govt. of India**

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

First Edition - 1955
Reprint - 1991
Reprint - 2020

Price ₹ 310-00

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

# आमुखम्

लोककल्याणाय परमकारुणिकाः ऋषयः आचार्याः च वेदान् पुराणानि शास्त्राणि च महता परिश्रमेण प्रणिनिन्युः। तेषाम् उपबृह्मणरूपाः नैके ग्रन्थाः विद्वद्भिः विरचिताः विरच्यमानाः सन्ति। अधीतिः, बोधः, आचरणम्, प्रचारणम् इति विद्यायाः चतुर्षु प्रकारेषु प्रचारणमपि अन्यतमम्। पूर्वसूरिभिः महता प्रयासेन लिखितानां ग्रन्थानां प्रकाशनेन ग्रन्थसुमनगतगहनविचारसुगन्धोऽपि सर्वत्र प्रसरेत्। तेन विद्यायाः प्रचारोऽपि सिध्यति। यद्यपि केचन ग्रन्थाः महता प्रयासेन द्रविणव्ययेन च प्रकाशमानीताः किन्तु ते ग्रन्थाः कालान्तरे दुर्लभतां गताः। तेन संस्कृतग्रन्थानाम् अधिजिगीषूणाम् अनुसन्धित्सूनां च काठिन्यं समजनि। भारतशासनान्तर्गतमानव-संसाधनविकासमन्त्रालयस्य पूर्वप्रकाशितानां दुर्लभानां च ग्रन्थानां पुनर्मुद्रणात्मक-परियोजनायां पुनर्मुद्रिताः अपीमे ग्रन्थाः कालक्रमेण भूयोपि दुर्लभतां जग्मुः। अतः पुनर्मुद्रणं कारयित्वा ग्रन्थानां सुलभता संपादनीया इति मन्त्रालयस्य सङ्कल्पमनु ग्रन्थरत्नानां पुनर्मुद्रणं प्रकाशनं च विधास्यते।

सन्दर्भेऽस्मिन् अपेक्षितं मार्गदर्शनं प्रदाय केन्द्रीयसंस्कृतविश्वविद्यालयं समेधितवद्भ्यः मानवसंसाधनविकासमन्त्रिवर्येभ्यः **डॉ. रमेश पोखरियाल निशंक** महाभागेभ्यः आधमर्ण्यं बिभर्मि। प्राशासनिकसहाय्यं विधाय कार्यसाफल्याय सहकृतवते मानवसंसाधनविकासमन्त्रालयस्य भाषाविभागस्य संयुक्तसचिवाय **श्री संजय कुमार सिन्हा** महाभागाय तद्विभागीयाधिकारिभ्यः कार्तज्ञ्यं संदिशामि।

संकल्पस्यास्य साकारतासंपादने प्रयासं कृतवन्तं विश्वविद्यालयस्य शोध-प्रकाशनविभागस्य उपनिदेशकं डा. मधुकेश्वर भट्टं तद्विविभागीयान् च साधुवादैः संभाजयामि। योग्ये काले सुन्दरं पुनर्मुद्रणं विधायोपकृतवते डी.वी. प्रिन्टर्स मुद्रणालयस्य अधिकारिणे साधुवादान् व्याहरामि। आशासे भूयः कृतानेन मुद्रणप्रयत्नेन विद्वांसः, छात्राः, संस्कृतानुरागिणः, लाभान्विताः भूयासुः इति।

भवतां विधेयः
**परमेश्वरनारायणशास्त्री**
कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः

ऽध्यायः' इति। ततश्च यन्त्रकथनोपक्रमे पुनरपि सोमदेवः स्वनामग्राहमाह—

'अथ यन्त्राणि वक्ष्यन्ते रसतन्त्राण्यनेकशः।
समालोक्य समासेन सोमदेवेन साम्प्रतम् ॥' (६।१) इति।
'नन्दी नागार्जुनश्चैव ब्रह्मज्योति मुनीश्वरः।
वेत्ति श्रीसोमदेवश्च नापरः पृथिवीतले ॥ (६।६५) इति च।

अस्याप्यध्यायस्य पुष्पिकायां लिखितमस्ति—'इति श्रीवैद्यपतिसिंहगुप्तस्य सूनो वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये यन्त्रनिरूपणं नाम नवमोऽध्यायः' इति।

एवमेवं च प्राप्ते ब्रूमः प्रागेव मूलरसरत्नसमुच्चयः सिंहगुप्तसूनुना प्रणीतः, सिंहगुप्तसूनुश्च तत्प्रणयनाद् रसवाग्भट इतिनाम्ना प्रसिद्धिं प्राप्तः (माधवोपाध्यायस्यायुर्व्वेदप्रकाशे), परं तु मौलिकत्वाभावात् संक्षिप्तत्वाच्च ग्रन्थोऽयं लोके प्रसिद्धिं न लेभे, ततो महति काले व्यतीते रसेन्द्रचूडामणिरसेन्द्रपरिभाषाकृत् सोमदेवस्तत्र कालोपयोगिनं प्रतिसंस्कारं विधाय तद्ग्रन्थं मूलकृतो नाम्नैव प्रचारयामासेति। वाग्भटमुनिश्चेद् मूलकारो न स्यात् तर्हि शङ्करगुरुं गोविन्दभगवत्पादमतिक्रम्य किमर्थं वाग्भटमुने र्नाम्ना ग्रन्थोऽयं प्रकाशितः? रसोपकल्पनसामर्थ्यं रसशास्त्राधिकारे च तस्मादधिकतरः प्रामाणिको भगवान् गोविन्दपाद इत्यत्र नास्ति कोऽपि सन्देहावकाशः। यदि प्राचीनतरे मुनिनामनि वा प्रीतिः स्यात् तर्हि वाग्भटं हित्वा व्याडिपतञ्जलिनागार्जुनादीनां मध्ये कस्यचिदेकस्य मुने र्नाम्ना ग्रन्थोऽयं किमिति न प्रकाशितः? सर्व्वं खल्वेतत् प्रतिपादयति यद् वाग्भट एव ग्रन्थस्य मूलकारो न तु कश्चिदन्य इति।

ननु प्रतिसंस्कृतौ प्रतिसंस्कर्त्तु र्नामाख्यापनमनुचितमिति चेत्? न। नवीनग्रन्थकृतामुक्तयः पण्डितै र्नाद्रियन्त इति कृत्वा प्रतिसंस्कर्त्रा ग्रन्थोऽयं मूलकर्त्तरि समारोपितः। वाग्भटस्य मूलकर्त्तृत्वात् तन्नाम्ना ग्रन्थस्यास्य प्रकाशः कथमपि दोषं नावहति। किमन्यत्, सोमदेव एतेन नूनं परां कोटिं स्वार्थत्यागस्य प्राकटयदिति मन्यामहे।



पञ्चदशखृष्टशताब्द्यां चिन्तामणिखरेशास्त्रिणा रसरत्नसमुच्चयस्य 'तरलार्थप्रकाशिनी'नाम्नी टीकैका विरचिता। एष टीकाकारः 'खरे'नाम्ना समधिकं प्रसिद्धः। ग्रन्थस्य प्रणयनकालविषये प्रतिसंस्कारविषये वा टीकाकारो जोषमवतिष्ठते।

रसरत्नसमुच्चयस्य रसोत्पत्तिनामकप्रथमाध्यायारम्भे लिखितमस्ति—

यस्यानन्दभवेन मङ्गलकलासम्भावितेन स्फुर-
द्धाम्ना सिद्धरसामृतेन करुणावीचीसुधासिन्धुना।
भक्तानां प्रभवप्रसंहृतिजरारागादिरोगाः क्षणा-
च्छान्तिं यान्ति जगत्प्रधानभिषजे तस्मै परस्मै नमः॥
आगमश्चन्द्रसेनश्च लङ्केशश्च विशारदः।
कपाली मत्तमाण्डव्यौ भास्करः शूरसेनकः॥
रत्नघोषश्च शम्भुश्च सात्त्विको नरवाहनः।
इन्द्रदो गोमुखश्चैव कम्बलि र्व्याडिरेव च॥
नागार्जुनः सुरानन्दो यागबोधि र्यशोधनः।
खण्डः कापालिको ब्रह्मा गोविन्दो लम्पको हरिः॥
सप्तविंशतिसंख्याका रससिद्धिप्रदायकाः।
रसांकुशो भैरवश्च नन्दी स्वच्छन्दभैरवः॥
मन्थानभैरवश्चैव काकचण्डीश्वरस्तथा।
वासुदेव ऋष्यशृङ्गः क्रियातन्त्रसमुच्चयी॥
रसेन्द्रतिलको योगी भालुकि र्मैथिलाह्वयः।
महादेवो नरेन्द्रश्च वासुदेवो हरीश्वरः॥